आचमन... केशवाय स्वाह..... श्री कृष्णाय नम:

## संकल्प –

प्रणानायम्य – शुभे शोभने मुहूर्ते .... संवत्सरे, दक्षिणायणे, वर्षऋतौ, श्रावण मासे कृष्ण पक्षे अष्टम्या शुभतिथौ, .. वासरे, ...... नक्षत्रे, ... योगे, ... करणे, एवंगुण विशेषण विषिष्टायां शुभतिथौ, श्री भारती रमण मुख्य प्राणांतर्गत श्री रुक्मीणि सत्यभामा सहित श्री गोपालकृष्ण प्रेरणया, श्री गोपालकृष्ण प्रीत्यर्थं, यथाशक्ति यथाव्यप्ति, यथावैभवं श्री गोपालकृष्णस्य ध्यानावाहनादि षोडचोपचार पूजां करिष्ये

## घंटावादनं – आगमार्थंतु......

**कलशपूजा** – "ओं क्लीं कृष्णाय नम: ओं" मंत्रदिंद १२ बारि कलशवन्नु अभिमंत्रिसि, अजादि मूर्तिं कलशे आवाहयामि ऎंदु हेळि, तुलसीदळवन्नु समर्पिसि, गंधा अक्षतॆगळन्नु समर्पिसि, प्रार्थिसि :

कलशस्य मुखे विष्णु: कंठे रुद्र: समाश्रित: ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणा: स्मृता: ।
कुक्षौ तु सागरा: सर्वे सप्तद्वीपा वसुंधरा ।
ऋग्वेदोऽथ यजुर्वेद: सामवेदो ह्यथर्वण: ।
अंगैश्च सहिता: सर्वे कलशांबु समाश्रिता: ।

गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिंधु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।
सर्वे समुद्रा: सरितस्तीर्थानि जलदा नदा: । आयांतु देव पूजार्थं अभिषेकार्थं आदरात् ।
अत्र गायत्री साविथ्री शांति: पुष्टिकरी तथा । आयांतु देवपूजार्थं अभिषेकार्थं आदरात् ।

इमं मे गंगे यमुने सरस्वति शुतुद्रिस्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥

## कलश प्रार्थना –

सर्वक्षेत्रमयो यस्मात् सर्वतीर्थमयो यत: । अतो हरिप्रियो.सि त्वं पूर्णकुंभ नमोस्तुते ।
कलश: कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलं । योग्यतां पापहानिं च पुण्यवृद्धिं च साधयेत् ।

## पंचामृत पूजा –

क्षीरे गोविंदाय नम: । दध्नि वामनाय नम: । घृते विष्णवे नम: । मधुनि मधुसूदनाय नम: ।
शर्करायां अच्युताय नम: । पंचामृत देवताभ्यो नम: ।

## पीठ पूजा –

विष्णोरासनभूताय दिव्यरत्न मयाय च । प्रधान पुरुषेषाय महापीठाय ते नम: ।
सर्वाभ्य: पीठ देवताभ्यो नम: तुलसी पुष्पं समर्पयामि ।

## शंखपूजा –

कलश पूजा नंतर शंखदल्लि शुद्ध जलवन्नु तुंबि, "ओं क्लीं कृष्णाय नमः " मंत्रदिंद अभिमंत्रिसि, गंधाक्षते समर्पिसि, प्रार्थिसबेकु.

त्वं पुरा सगरोत्पन्नो विष्णु ना विधृतः करे ।
नमितः सर्वदेवैश्च पांच जन्य नमो.स्तुते ।
गर्भादेवारिनारीणां विशीर्यंते सहस्रधा ।
तव नादेन पाताले पांचजन्य नमोस्तु ते ।
...

## प्राणप्रतिष्टा –

ओं आं ह्रीं क्रौं । यं रं लं वं शं षं सं हं हंस सो.हं ।
अश्यां मूर्तौ प्राणास्तिओश्ठंतु । अस्यां मूर्तौ जूव इह स्थितः । अस्यां मुर्तौ सर्वेंद्रियाणि मनः, श्रोतृ, त्वक्, चक्षुः, जिह्वा, आघ्राणवाक्, पाणि, पाद, पायूपस्थाख्यानि ऎहैवागत्य सुखं चितं तिष्यंतु स्वाहा ओं ।

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं।
जोक्पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति ।
पुनर्नो असुं पृथिवी ह्ातु पुनर्द्यौर्देवी पुनरंतरिक्षं ।
पुनर्नस्सोमस्तन्वं ददातु पुनः पूषा पथ्यां या स्वस्तिः: ॥

ओं भूः श्री गोपालकृष्णं आवाययामि ।
ओं भुवः श्री गोपालकृष्णं आवाययामि ।
ओं स्वः श्री गोपालकृष्णं आवाययामि ।
ओं भूर्भुवः स्वः श्री गोपालकृष्णं आवाययामि ।

आवाहितो भव । स्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव । अवकुंठितो भव । सुप्रसन्नो भव । वरदो भव । शांतो भव ।

ध्यानं –
(कैयल्लि तुलसीपुष्पगळन्नु हिडिदुकॊंडु श्रीकृष्णनन्नु ध्यानिसबेकु)
ध्यायेद्धरिनिणिनिभं जगदेकवंद्यं । सौंदर्यसारमरिशंखवराभयानि ।
दोभिर्दधानमजितं सरसं च भैष्मीसत्यासमेतं अखिलप्रदं इंदिरेशं ॥

तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदाध्युदायुधं ।
श्रीवत्सलक्ष्म्यं गलशोभिकौस्तुभं पीतांबरं सांद्रपयोदसौभगं ॥
महार्हवैडूर्य किरीटकुंडल त्विषा परिष्वक्त सहस्रकुंतलं ।
उद्दामकांचंगदकंकणादिभिर्विरीचमानं वसुदेव ऐक्षत ।
अतसीपुष्पसंकाशं चतुर्बाहुं शुभेक्षणं । देवक्यंकस्थितं कृष्णं वसुदेवं च देवकीं ।

कृष्णं च बलभद्रं च वसुदेवं च देवकीं ।
नंद्गोपं यशोदां च सुभद्रां रोहिणीं तथा ।
दुर्गां चैव सुरश्रेष्टान् पूजये.हं शुभप्रदान् ।

कृष्णप्रतिमेयन्नु स्थापिसबेकु –
ध्येये चतुर्भुजं कृष्णं शंखचक्रगदाधरं ।
पीतांबरयुगोपेतं लक्ष्मीयुक्तं विभूषितं ।
लसत्कौस्तुभ शोभाढ्यं मेघश्यामं सुलोचनं ।

बलभद्र स्थापने –
नमस्ते दैत्यनाशाय संभूतामरवल्लभ ।
बलभद्र नमस्तुभ्यं प्रलंबासुरमर्दनं ।

वसुदेव स्थापने –
सोमान्वयसमुद्भूत स्वधर्मनिरतानिशं ।
जगदीशकृपापात्रं वसुदेव नमोस्तुते ।

देवकी स्थापने –
अदिते देवमाता त्वं सर्वपापप्रणाशिनि ।
त्वामहं स्थापयिष्यामि प्रसन्ना भव देवकि ।

यशोदा, नंदगोप स्थापने –
नंद्गोप नमस्तुभ्यं गोपालकुलभूषण ।
विष्णुप्रिय विशुद्धात्मन् कृष्ण तात शुभप्रद ॥

आवाहन ––
ओं क्लीं कृष्णाय नमः श्री कृष्णं आवाहयामि

कृष्णं च बलभद्रं च वसुदेवं च देवकीं ।
नंद्गोपं यशोदां च सुभद्रां तत्र पूजयेत् ।
सकलपरिवारदेवताभ्यो नमः ताः आवाहयामि ।

आसन समर्पण –
ओं श्री कृष्णाय नमः आसनं समर्पयामि ।
पाद्य समर्पण –
ओं श्री कृष्णाय नमः पाद्यं समर्पयामि ।
अर्घ्य समर्पण –
ओं श्री कृष्णाय नमः अर्घ्यं समर्पयामि ।

### आचमन समर्पण –
ओं श्री कृष्णाय नमः आचमनं समर्पयामि ।

### मधुपर्क समर्पण –
ओं श्री कृष्णाय नमः मधुपर्कं समर्पयामि ।

### पंचामृत स्नान –
पयोधधिघृतक्षौद्रशर्करास्नानमुत्तमं ।
तृप्त्यर्थं देवदेवेश गृह्यतां देवकीसुत ।

ओं श्री कृष्णाय नमः पयः स्नानं समर्पयामि (हालु)
ओं श्री कृष्णाय नमः दधिस्नानं समर्पयामि (मॊसरु)
ओं श्री कृष्णाय नमः घृतस्नानं समर्पयामि (तुप्प)
ओं श्री कृष्णाय नमः मधुस्नानं समर्पयामि (जेनु)
ओं श्री कृष्णाय नमः शर्करस्नानं समर्पयामि (सक्करॆ)

### नंतर शुद्ध नीरिनिंद –
ओं श्री कृष्णाय नमः शुद्धोधक स्नानं समर्पयामि (नीरु)
इति श्री कृष्णाय नमः पंचामृतं तथा शुद्धोदकस्नानं समर्पयामि ॥

वस्त्र, यज्ञोपवीत, आभरण, गंध, अक्षता, पुष्प समर्पण –
ओं श्री कृष्णाय नमः वस्त्रं समर्पयामि ।
ओं श्री कृष्णाय नमः यज्ञोपवीतं समर्पयामि ।
ओं श्री कृष्णाय नमः आभरणं समर्पयामि ।
ओं श्री कृष्णाय नमः गंधां समर्पयामि ।
ओं श्री कृष्णाय नमः अक्षतां समर्पयामि ।
ओं श्री कृष्णाय नमः नानविध परिमळ पुष्पाणि समर्पयामि ।

### अथ अंग पूजा –
श्री गोविंदाय नमः पादौ पूजयामि ।
श्री गोविंदाय नमः गुल्फौ पूजयामि ।
श्री गोविंदाय नमः जंघे पूजयामि ।
श्री गोविंदाय नमः ऊरूं पूजयामि ।
श्री गोविंदाय नमः मेढ्रं पूजयामि ।
श्री गोविंदाय नमः कटिं पूजयामि ।
श्री गोविंदाय नमः नाभिं पूजयामि ।
श्री गोविंदाय नमः उदरं पूजयामि ।
श्री गोविंदाय नमः वक्शस्थलं पूजयामि ।
श्री गोविंदाय नमः स्तनौ पूजयामि ।
श्री गोविंदाय नमः बाहू पूजयामि ।
श्री गोविंदाय नमः हस्तौ पूजयामि ।

श्री गोविंदाय नमः कंठं पूजयामि ।
श्री गोविंदाय नमः मुखं पूजयामि ।
श्री गोविंदाय नमः नासिकां पूजयामि ।
श्री गोविंदाय नमः नेत्रौ पूजयामि ।
श्री गोविंदाय नमः श्रोत्रे पूजयामि ।
श्री गोविंदाय नमः ललाटं पूजयामि ।
श्री गोविंदाय नमः शिरः पूजयामि ।
श्री गोविंदाय नमः सर्वांगाणि पूजयामि ।
(ईरीतियागि पाददिंद शिरदवरेगू परमात्मन अवयवगळन्नु तुळसी, अक्षतेगळन्नु समर्पिसि पूजिसबेकु)

## पत्रपूजां–

ओं श्री कृष्णाय नम : तुलसीपत्रं, तथा चूतपत्रं, तथा चंपकपत्रं, तथा धात्रीपत्रं, तथा विष्णुकांतिपत्रं तथा, दूर्वापत्रं, तथा औदुंबरपत्रं तथा वटपत्रं, तथा शमीपत्रं, तथा पद्मपत्रं, सेवंतिकापत्रं, नानाविध पत्राणि समर्पयामि।

## पुष्पार्चन –

श्री संकर्षणाय नमः केतकीपुष्पं समर्पयामि ।
श्री वासुदेवाय नमः कमलपुष्पं समर्पयामि ।
श्री प्रद्युम्नाय नमः चंपकपुष्पं समर्पयामि ।
श्री अनिरुद्धाय नमः मल्लिकापुष्पं समर्पयामि ।
श्री पुरुषोत्तमाय नमः जाजीपुष्पं समर्पयामि ।
श्री अधोक्षजाय नमः सौगंधिकापुष्पं समर्पयामि ।
श्री नरसिंहाय नमः कुमुदपुष्पं समर्पयामि ।
श्री अच्युताय नमः अशोकपुष्पं समर्पयामि ।
श्री जनार्दनाय नमः करवीरपुष्पं समर्पयामि ।
श्री उपेंद्राय नमः नागचंपकपुष्पं समर्पयामि ।
श्री हरये नमः मंदारपुष्पं समर्पयामि ।
श्री कृष्णाय नमः पारिजातपुष्पं समर्पयामि ।
श्री रुक्मिणिसहिताय कृष्णाय नमः नानाविध परिमळ पुष्पाणि समर्पयामि ।

श्री मत्स्याय नमः । श्री कूमाय नमः । श्री वराहाय नमः । श्री नरसिंहाय नमः ।
श्री वामनाय नमः । श्री परशुरामाय नमः । श्री रामाय नमः । श्री कृष्णाय नमः ।
श्री बुद्धाय नमः । श्री कल्किने नमः ।

परमात्मने सततमेकरूपिणे दशरूपिणे शतसहस्ररूपिणे ।
अविकारिणे स्फुटमनंतरूपिणे सुखचित्समस्ततनवे नमो नमः ।

श्री कृष्णाय नमः धूपं आघ्रापयामि ।
श्री कृष्णाय नमः दीपं दर्शयामि ।

## नैवेद्य समर्पण –

देवर मुंभ्हागदल्लि चतुष्कोण मंडलवन्नु बरेदु, अदर मेले श्रीकार बरेदु, नैवेद्यवन्नु अदर मेलिरिसि, तुप्पदिंद अभिघार माडि, तुलसी मत्तु जलवन्नु बलगैयल्लि हिडिदु "ओं क्लीं कृष्णाय नमः " ऎंदु प्रोक्षिसि, तुलसी दळवन्नु नैवेद्यद मेलिरिसि, तार्क्ष्यादि पंच मुद्रे प्रदर्शिसि, कृष्न मंत्रवन्नु जपिसि,

"ओं भूर्भुवः स्वः सत्यं त्वर्तेन परिषिंचामि" ऎंदु परिषेचन माडबेकु.

श्री कृष्णाय नमः आपोशनार्थे उदकं समर्पयामि ।
ओं प्राणाय स्वाह । अनिरुद्धाय इदं न मम ।
ओं अपायनाय स्वाह । प्रद्युम्नाय इदं न मम ।
ओं व्यानाय स्वाह । संकर्षणाय इदं न मम ।
ओं उदानाय स्वाह । वासुदेवाय इदं न मम ।
ओं समानाय स्वाह । नारायणाय इदं न मम ।

नाना विध षड्रोसोपेतं भक्ष्यं समर्पयामि ।
(द्वादश स्तोत्र, श्री कृष्ण षडक्षर मंत्र जपिसबेकु)

श्री कृष्णाय नमः पानीयार्थे उदकं समर्पयामि ।
अमृतापिधानमसि स्वाह । उत्तरापोशनार्थे उदकं समर्पयामि ।

हस्तमुखप्रक्षलनार्थे उदकं समर्पयामि । गंडूषार्थे उदकं समर्पयामि ।
करोद्वर्तनार्थे चंदनं समर्पयामि । नैवेद्यानंतरं आचमनं समर्पयामि ।

## फल, तांबुल, दक्षिणां, नीराजनं समर्पणं

– ओं श्री कृष्णाय नमः नानाविध फलानि समर्पयामि ।
ओं श्री कृष्णाय नमः तांबूलं समर्पयामि ।
ओं श्री कृष्णाय नमः हिरण्यदक्षिनां समर्पयामि ।
ओं श्री कृष्णाय नमः नीराजनं समर्पयामि ।

जयत्यजोखंडागुणोरुमंडलः सदोदितो ज्ञानमरीचिमाली ।
स्वभक्तहार्दोच्चतमोनिहंता व्यासावतारो हरिरात्म भास्करः ।
जयत्यजोक्षीणसुखात्म बिंबः स्वैश्वर्यकांतिप्रततः सदोदितः ।
स्वभक्तसंतापदुरिष्ट हंता रामावतारो हरिरीशचंद्रमाः ।

जयत्य संख्यीरुबलांबुपूरो गुणोच्चरत्नाकर आत्मवैभवः ।
सदा सदात्मज्ञानदीदिभिराप्यः कृष्णावतारो हरिरेकसागरः ॥
(श्री कृष्णाय नमः । मंगलनीराजनं समर्पयामि )

मंत्रपुष्पांजलि –
नमोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नम: ।

ओं श्री कृष्णाय नम: । छत्र चामरदर्पण नृत्यगीत वाद्यांडोलिकादि समस्तराजोपचारान् समर्पयामि ।

प्रदक्षिण मंत्र –
यानि कानि च पापानि जन्मांतर कृतानि च ।
तानि तानि विनश्यंति प्रदक्षिण पदे पदे
विश्वेश्वर विशालाक्ष विश्वंभर जनार्दन ।
प्रदक्षिणं करोम्यद्य नमस्ते ऽभीष्टदायक ।

ओं श्री कृष्णाय नम: प्रदक्षिण नमस्कारान् समर्पयामि ।

अपराध सहस्राणि कियंते अहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ।

देवकी नंदन श्रीश हरे संसारसागरात् ।
त्राहि मां सर्वपापघ्न दु:खशोकार्णवात् प्रभो ।
सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे ।
त्राहि मां सर्वदु:खघ्न रोगशोकार्णवाद्धरे ।

पापो.हं पापकर्मा. हं पापात्मा पापसंभव: ।
त्राहि मां कृपया देव शरणागतवत्सल ।

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष रक्ष जनार्दन ।
कृष्ण कृष्ण कृपालो त्वमगतीनां गतिभव।
संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥

सर्व समर्पण –

यस्य स्मृत्या च नामोक्त्या तप: पूजा कियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं ।
मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
तत्पूजितं मयादेव परिपूर्ण तदस्तुमे ।

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्याऽऽत्मना वाऽनुसृतस्वभावात् ।
करोमि यद्यत् सकलं परस्म नारायणेति समर्पयामि ।

श्री मध्वांतर्गत श्री रुक्मिणीसहित गोपालकृष्ण प्रेरणया श्री गोपालकृष्ण प्रीत्यर्थं चंद्रोदयकाले अनेन मया आचरित श्री कृष्ण पूजाराधनेन श्रीमध्वांतर्गत भगवान् श्री गोपालकृष्ण प्रीयतां । प्रीतो भवतु ।

कृष्णार्घ्य प्रदान

आचमा, प्राणायाम, संकल्प....
शुभे शोभने मुहूर्ते.... श्री मध्वांतर्गत श्री गोपालकृष्न प्रेरणया, श्री गोपालकृष्ण प्रीत्यर्थं, श्री कृष्ण जन्माष्टमि जयंति व्रत संपूर्ण फलप्राप्त्यर्थं निशीथे चंद्रोदयकाले अर्घ्य प्रदानं करिष्ये ।

कृष्णं च बलभद्रं च वसुदेवं च देवकीं ।
नंद्गोपं यशोदां च सुभद्रां रोहिणीं तथा ।
दुर्गां चैव सुरश्रेष्टान् पूजयेऽहं शुभप्रदान् ।
कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविंदाय नमो नमः ।
कृष्णाय यादवेंद्राय ज्ञानमुद्राय योगिने ।
नाथाया रुक्मिणीशाय नमो वेदांतवेदिने ।

शंखदल्लि शुद्धोदक, तुलसि, फल, हिरण्य तुंबिसि, ई कॆळगिन मंत्रदिंद अर्घ्य समर्पिसबेकु –
जातः कंसवधार्थाय भूभारोत्तारणाय च ।
कौरवाणां विनाशाय दैत्यानां निधनाय च ।
पांडवानां हितार्थाय धर्मसंस्थापनाय च ।
गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरेः ।
देवकी सहिताय श्री कृष्णाय इदमर्घ्यमिदमर्घ्यमिदमर्घ्यं समर्पयामि
( ३ बारि नीरन्नू, नंतर ३ बारि हालिनिंद अर्घ्यवन्नु नीडबेकु )

चंद्रार्घ्य प्रदान –
क्षीरोदार्णवसंभूत अत्रिनेत्र समुद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितः शशिन् ।
रोहिणी सहिताय चंद्रमसे इदमर्घ्यमिदमर्घ्यमिदमर्घ्यं समर्पयामि

संग्रह – नरहरि सुमध्व
आधार – श्री व्यासनकॆरॆ प्रभंजनाचार्यर "श्री कृष्णजयंति व्रत"